# कलावती कमलासनयुवती

## रागम्: कलावति ताळम्: आदि

श्री मुत्तुस्वामि दीक्षित विरचिता

**पल्लवि**

कलावती कमलासनयुवती कल्याणं कलयतु सरस्वती

**अनुपल्लवि**

बलाबलामन्त्रार्णरूपिणी भारतीमातृकाशरीरणी

**मध्यमकाल साहित्यम्**

मलाळिविदारिणी वाग्वाणी मधुकरवेणी वीणापाणी

**चरणम्**

शरद्ज्योत्स्नाशुभ्राकारा शशिवदना काश्मीरविहारा
परा शारदा पराङ्कुशधरा वरदाभयपाशपुस्तककरा

**मध्यमकाल साहित्यम्**

सुरार्चितपदाम्बुजा शोभना श्वेतपङ्कजासना सुरदना
पुरारि गुरुगुहहृदयरञ्जनी मुरारिस्नुषा निरञ्जनी

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇